श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीशेषशर्माभिनव कृता

# ॥ श्री पद्मावतीनवरत्नमालिकास्तुतिः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री पद्मावतीनवरत्नमालिकास्तुतिः ॥

श्रीमान् यस्याः प्रियस्सन् सकलमपि जगज्जङ्गमस्थावराद्यं
स्वर्भूपातालभेदं विविधविधमहाशिल्पसामर्थ्यसिद्धम्।
रञ्जन् ब्रह्मामरेन्द्रैस्त्रिभुवनजनकः स्तूयते भूरिशो यः
सा विष्णोरेकपत्नी त्रिभुवनजननी पातु पद्मावती नः॥ 1 ॥

श्रीशृङ्गारैकदेवीं विधिमुखसुमनःकोटिकोटीरजाग्रद् -
रत्नज्योत्स्नाप्रसारप्रकटितचरणाम्भोजनीराजितार्चाम्।
गीर्वाणस्त्रैणवाणीपरिफणितमहाकीर्तिसौभाग्यभाग्यां
हेलानिर्दग्धदैन्यश्रमविषममहारण्यगण्यां नमामि॥ 2 ॥

विद्युत्कोटिप्रकाशां विविधमणिगणोन्निद्रसुस्निग्धशोभा -
सम्पत्सम्पूर्णहाराद्यभिनवविभवालङ्क्रियोल्लासिकण्ठाम्।
आद्यां विद्योतमानस्मितरुचिरचितानल्पचन्द्रप्रकाशां
पद्मां पद्मायताक्षीं पदनलिननमत्पद्मसद्मां नमामि॥ 3 ॥

शश्वत्तस्याः श्रयेऽहं चरणसरसिजं शार्ङ्गपाणेः पुरन्ध्र्याः
स्तोकं यस्याः प्रसादः प्रसरति मनुजे क्रूरदारिद्र्यदग्धे।
सोऽयं सद्योऽनवद्यस्थिरतररुचिरश्रेष्ठभूयिष्ठनव्य -
स्तव्यप्रासादपङ्क्तिप्रसितबहुविधप्राभवो बोभवीति॥ 4 ॥

सौन्दर्योद्वेलहेमाम्बुजमहितमहासिंहपीठाश्रयाढ्यां
पुष्यन्नीलारविन्दप्रतिमवरकृपापूरसम्पूर्णनेत्राम्।
ज्योत्स्नापीयूषधारावहनवसुषमक्षौमधामोज्ज्वलाङ्गीं
वन्दे सिद्धेशचेतस्सरसिजनिलयां चक्रिसौभाग्यऋद्धिम्॥ 5 ॥

संसारक्लेशहन्त्रीं स्मितरुचिरमुखीं सारशृङ्गारशोभां
सर्वैश्वर्यप्रदात्रीं सरसिजनयनां संस्तुतां साधुबृन्दैः।
संसिद्धस्निग्धभावां सुरहितचरितां सिन्धुराजात्मभूतां
सेवे संभावनीयानुपमितमहिमां सच्चिदानन्दरूपाम्॥ **6**॥

सिद्धस्वर्णोपमानद्युतिलसिततनुं स्निग्धसम्पूर्णचन्द्र -
व्रीडासंपादिवक्त्रां तिलसुमविजयोद्योगनिर्निद्रनासाम्।
तादात्वोत्फुल्लनीलाम्बुजहसनचणात्मीयचक्षुःप्रकाशां
बालश्रीलप्रवालप्रियसखचरणद्वन्दरम्यां भजेऽहम्॥ **7**॥

यां देवीं मौनिवर्याः श्रयदमरवधूमौलिमाल्यार्चिताङ्घ्रिं
संसारासारवारान्निधितरतरणे सर्वदा भावयन्ते।
श्रीकारोत्तुङ्गरत्नप्रचुरितकनकस्निग्धशुद्धान्तलीलां
तां शश्वत्पादपद्मश्रयदखिलहृदाह्लादिनीं ह्लादयेऽहम्॥ **8**॥

आकाशाधीशपुत्रीं श्रितजननिवहाधीनचेतःप्रवृत्तिं
वन्दे श्रीवेङ्कटेशप्रभुवरमहिषीं दीनचित्तप्रतोषाम्।
पुष्यत्पादारविन्दप्रसृमरसुमहश्शामितस्वाश्रितान्त -
स्तामिस्रां तत्त्वरूपां शुकपुरनिलयां सर्वसौभाग्यदात्रीम्॥ **9**॥

श्रीशेषशर्माभिनवोपक्लृप्ता
प्रियेण भक्त्या च समर्पितेयम्।
पद्मावतीमङ्गलकण्ठभूषा
विराजतां श्रीनवरत्नमाला॥ **10**॥

॥ श्री पद्मावतीनवरत्नमालिकास्तुतिः समाप्ता॥